# कर्मविपाकसंहिता

## ( नक्षत्रचरणफलदर्शिका )

अनुवादक:
पं० वस्तीराम:

राष्ट्रियसंस्कृतसंस्थानम्
नवदेहली

# कर्मविपाकसंहिता

## ( नक्षत्रचरणफलदर्शिका )

अनुवादकः

**पं० वस्तीरामः**

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

( भारतशासन-मानवसंसाधनविकास-मन्त्रालयाधीनम् )

नवदेहली

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्य: प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदा:, शास्त्रीयं वाङ्मयम्, इतिहास:, पुराणानि, काव्यानीत्यनेकरचना: विकासं गता:। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविधप्रयासै: प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमा: परम्परा: संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविधग्रन्थमाला: संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुन: प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृत: परिभाषेन्दुशेखर: इति नामक: व्याकरणशास्त्रीय: संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थ: सर्वै: यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्य: सर्वेभ्य: संस्थानस्य अधिकारिभ्य: सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**– राधावल्लभ: त्रिपाठी**

# विषयानुक्रमणिका


| | | |
|---|---|---|
| | पुरोवाक् | *iii* |
| ***अध्याय:*** | ***अध्यायनाम*** | **पृ.सं.** |
| १. | पूजनविधि: | १ |
| २. | अश्विनीनक्षत्रफलम् | ८ |
| ३. | प्रायश्चित्तकथनम् | १५ |
| ४. | अश्विनीनक्षत्रद्वितीयचरणविचारणम् | १८ |
| ५. | अश्विनीनक्षत्र तृतीयचरणविचारणम् | २२ |
| ६. | अश्विनीनक्षत्रस्य चतुर्थचरणविचारणम् | २५ |
| ७. | स्त्रीकर्मकथनम् | ३० |
| ८. | भरणीनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनम् | ३५ |
| ९. | भरणीनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनम् | ३८ |
| १०. | भरण्यास्तृतीयचरणप्रायश्चित्तकथनम् | ४१ |
| ११. | भरण्याश्चतुर्थचरणप्रायश्चित्तकथनम् | ४४ |
| १२. | कृत्तिकाप्रथमचरणप्रायश्चित्तकथनम् | ४८ |
| १३. | कृत्तिकानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनम् | ५१ |
| १४. | कृत्तिकानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनम् | ५४ |
| १५. | कृत्तिकानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनम् | ५७ |
| १६. | रोहिणीनक्षत्रस्य प्रथमचरणकथनम् | ६० |
| १७. | रोहिणीनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनम् | ६३ |
| १८. | रोहिणीतृतीयचरणप्रायश्चित्तकथनम् | ६६ |
| १९. | रोहिणीनक्षक्षचतुर्थचरणप्रायश्चित्तकथनम् | ७० |
| २०. | मृगशिरानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनम् | ७३ |
| २१. | मृगशिराद्वितीयचरणप्रायश्चित्तकथनम् | ७६ |
| २२. | मृगशिरानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनम् | ७८ |
| २३. | मृगशिरानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनम् | ८१ |

॥ ६ ॥

# अश्विनीनक्षत्रस्य चतुर्थचरणविचारणम्

॥ शिव उवाच ॥

**शृणु देवि वरारोहे नृणां कर्मविपाकजम्।**
**तदहं संप्रवक्ष्यामि यथाकर्मानुसारतः ॥ १ ॥**

भा० टी०—शिव जी कहते हैं—हे देवि! हे वरारोहे!! मनुष्यों के कर्मों के विपाक से उत्पन्न हुए फल को सुनो। मैं जिसको कर्मों के अनुसार कहूँगा॥ १ ॥

**पुत्रा बहुविधा देवि लौकिका वै विचक्षणाः।**
**जायन्ते नात्र संदेहस्तत्सर्वं शृणु वल्लभे!॥ २ ॥**

भा० टी०—हे देवि! अनेक प्रकार के लौकिक विद्वान् पुत्र उत्पन्न होते हैं। इसमें संदेह नहीं है। हे वल्लभे! उनके विषय में सुनो॥ २ ॥

**प्रथमः पुण्यसंबन्धो मातृपितृप्रियः सदा।**
**सुसेवानिरतो नित्यं पितुर्मातुश्च यत्नतः ॥ ३ ॥**

भा० टी०—प्रथम प्रकार का पुत्र पुण्य के संबंध वाला सदा माता-पिता को प्रिय होता है। नित्य प्रति प्रयत्नपूर्वक माता-पिता की सेवा करने में तत्पर रहता है॥ ३ ॥

**आजन्ममरणाद्देवि पितुराज्ञां करोति च।**
**मरणे पितृमात्रोश्च श्राद्धं कुर्याद्दिने दिने॥ ४ ॥**

भा० टी०—हे देवि! जन्म से ले कर मरण पर्यन्त माता-पिता की आज्ञा का पालन करता है। जब माता-पिता मर जाते हैं तो तब तिथि पर्व पर श्राद्ध करता है।॥४ ॥

**पितृश्राद्धं विना देवि भोजनं न करोति हि।**
**द्वितीयः शत्रुसंबंधी तस्य चेष्टां च मे शृणु॥ ५ ॥**

भा० टी०—हे देवि! वह पुत्र पिता के श्राद्ध किये बिना भोजन भी नहीं करता है। दूसरे प्रकार का शत्रु संबंधी पुत्र होता है, जिसकी चेष्टा मुझसे सुनो॥ ५ ॥

**पूर्वजन्मप्रसङ्गेन शत्रुः पुत्रः प्रजायते।**
**जन्मतः शत्रुरूपेण मातृपित्रोर्विरोधकृत्॥ ६ ॥**